1. सृष्टि प्रक्रियाया उल्लेखो वर्त्तते –

(a) अग्नि सूक्ते (b) हिरण्यगर्भ सूक्ते (c) वरुण सूक्ते (d) रुद्र सूक्ते

2. कठोपनिषद् सम्बद्धास्ति –

(a) शुक्ल यजुर्वेदेन (b) सामवेदेन

(c) कृष्ण यजुर्वेदेन (d) ऋग्वेदस्य वाष्कल शाखया

3. यजुर्वेदीय ब्राह्मण ग्रन्थस्य नाम अस्ति –

(a) एतरेय ब्राह्मणम् (b) शतपथ ब्राह्मणम् (c) गोपथ ब्राह्मणम् (d) ताण्ड्य ब्राह्मणम्

4. 'सप्तर्षयः' इत्यस्मिन् पदे समासोऽस्ति

(a) तत्पुरुषः (b) द्विगुः (c) बहुव्रीहिः (d) द्वन्द्वः

5. चत्वारि शृङ्गा त्रयो अस्य पादाः द्वे शीर्षे सप्त हस्तासो अस्य ।
कस्य वेदस्य मन्त्रान्शः ?

(a) यजुर्वेदस्य (b) ऋग्वेदस्य (c) अथर्ववेदस्य (d) सामवेदस्य

6. शिक्षाग्रन्थाः किं प्रतिपादयन्ति ?

(a) निर्वचनम् (b) उच्चारणम् (c) व्याकरणम् (d) काल–निर्धारणम्

7. अद्भ्यः उत्पत्तेः सिद्धान्तम् कस्मिन् सूक्तेडस्ति ?

(a) नासदीय सूक्ते (b) शिवसंकल्प सूक्ते (c) पुरुष सूक्ते (d) भूमि सूक्ते

8. आरण्यक संज्ञया के ग्रन्थाः अभिधीयन्ते ?

(a) येषां श्रवणं आरण्यके भवति । (b) ये ग्रन्थाः वने विरचिता ।

(c) ये ग्रन्थाः वनात् आनीयन्ते । (d) ये ग्रन्थाः स्त्रीभिः पठ्यन्ते ।

9. 'हृ' धातोः लुङ्लकारे मध्यम पुरुष बहुवचने एवं रूपं भवति –

(a) अहार्षुः (b) अहार्ष्ट (c) जहार (d) अहार्ष्टम्

10. ऋग्वेदसम्बद्धो ब्राह्मण ग्रन्थो वर्त्तते –

(a) ऐतरेय ब्राह्मणम् (b) आर्षेय ब्राह्मणम् (c) शतपथ ब्राह्मणम् (d) गोपथ ब्राह्मणम्

11. वेदस्य पादौ किम् ?

(a) व्याकरणम् (b) निरुक्तम् (c) छन्दः (d) ज्योतिषम्

12. अग्रणीर्भवति –

(a) वरुणः (b) इन्द्रः (c) विष्णुः (d) अग्निः

13. कस्मान्न ऋते किंचन कर्म क्रियते ?

(a) हस्तात् (b) शिरसः (c) मनसः (d) चक्षुषः

14. "यज्ञमध्वरं विश्वतः परिभूरसि" कस्मैदेवाय उक्तम् ?

(a) इन्द्राय (b) अग्नये (c) रुद्राय (d) सवित्रे

15. निम्नलिखितेषु को निपातः उपमार्थे नास्ति :

(a) अद्धा (b) न (c) चित् (d) इव

16. वेदभाष्यकार 'विन्टरनिट्ज' कस्य देशस्य आसीत् ?

(a) ब्रिटेन देशस्य (b) फ्रान्स देशस्य (c) जर्मनी देशस्य (d) अमरीका देशीयः

17. "उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत"
इत्युक्ति कस्मिन् ग्रन्थे प्राप्यते ?

(a) केनोपनिषदि (b) कठोपनिषदि (c) ऋग्वेदे (d) अथर्ववेदे

18. "माताभूमिः पुत्रोऽहं पृथिव्याः"
इति सूक्तिः कुत्र वर्त्तते ?

(a) शिवसंकल्प सूक्ते (b) पुरुष सूक्ते (c) नासदीय सूक्ते (d) पृथ्वी सूक्ते

19. सम्प्रति ऋग्वेदस्य पूर्णरूपेण उपलब्धा शाखा अस्ति –

(a) आश्वलायन शाखा (b) वाष्कल शाखा
(c) शाकल शाखा (d) शांखायन शाखा

20. स्पर्शवर्णाः सन्ति

(a) चतुर्विंशतिः (b) पंचविंशतिः (c) अष्टविंशतिः (d) तिस्रः

21. कतमा धातुः उभयपदी धातुः नास्ति –

(a) याच् (b) भूष् (c) जि (d) मण्ड्

22. 'अविश्रमोऽयं लोकतन्त्राधिकारः' सूक्तिरियम् अभिज्ञानशाकुन्ते उक्ता –

(a) राज्ञा दुष्यन्तेन (b) कञ्चुक्या (c) विदूषकेन (d) प्रथम वैतालिकेन

23. 'उपपन्ना हि दारेषु प्रभुता सर्वतोमुखी'
सूक्तिरियम् अभिज्ञानशाकुन्तले उक्ता –

(a) राज्ञा दुष्यन्तेन (b) शार्ङ्गरवेन (c) गौतम्यया (d) शारद्वतेन

24. तैत्तिरीयोपनिषद्ः वेदोऽस्ति –

(a) ऋग्वेदः (b) शुक्ल यजुर्वेदः (c) कृष्ण यजुर्वेदः (d) सामवेदः

25. "यदक्षरपरिमाणं तच्छन्दः" इत्यस्य कर्त्ता कः ?

(a) कात्यायनः (b) पतञ्जलिः (c) भरतमुनिः (d) सायणः

26. वैदिक छन्देषु षड्त्रिंशत् (36) अक्षराणि भवन्त्यत्र –

(a) त्रिष्टुप् (b) बृहती (c) जगती (d) गायत्री

27. निरुक्ते कति शब्दानां निर्वचनम् ?

(a) 1579 (b) 1671 (c) 1700 (d) 1771

28. शिक्षा वेदाङ्गस्य अङ्गानि उपलभ्यन्ते –

(a) प्रश्नोपनिषदि (b) मुण्डकोपनिषदि (c) तैत्तिरीयोपनिषदि (d) माण्डूक्योपनिषदि

29. एतरेय – आरण्यकस्य प्रवचनकर्ता

(a) महर्षि याज्ञवल्कयः (b) महिदासः
(c) शौनकः (d) गुणाख्यः

30. सांख्यमतानुसारेण गुणत्रयं वर्त्तते –

(a) ज्ञानदर्शनक्रियाः (b) सत्वरजस्तमांसि (c) काम क्रोध मोहाः (d) सत्याहिंसास्तेयम्

31. सांख्यकारिकायाम् कति प्रमाणानामुल्लेखोऽस्ति ?

(a) द्विविधम् (b) त्रिविधिम् (c) चतुर्विधम् (d) षड्विधम्

**32.** स्मृतिव्यतिरिक्तं ज्ञानमस्ति –

(a) अनुभवः (b) अनुग्रहः (c) अनुचरः (d) अध्यासः

**33.** 'वणिज्' शब्दस्य द्वितीया बहुवचनस्य रूपं एवं भवति –

(a) वणिजः (b) वणिजानि (c) वणिजम् (d) वणिकाः

**34.** 'आकांक्षा–योग्यता–सन्निधिमतां पदानां समूहः' किं कथ्यते ?

(a) साधनम् (b) कारणम् (c) वाक्यम् (d) प्रमाणम्

**35.** "जनन–मरण–करणानां प्रतिनियमादयुगपत्प्रवृत्तेश्च' ………… । इत्यत्र किं सिद्धयति ?

(a) प्रकृति–त्रिगुणत्वम् (b) पुरुष–निर्गुणत्वम्

(c) प्रकृति–जड़त्वम् (d) पुरुष–बहुत्वम्

**36.** तर्कभाषाया मुल्लिखितः

इन्द्रियार्थ सन्निकर्षः कतिविधः –

(a) चतुर्विधः (b) पञ्चविधः (c) षड्विधः (d) सप्तविधः

**37.** तर्कभाषायां 'प्रमाणस्य' लक्षणमस्ति –

(a) प्रकृष्टं कारणम् (b) प्रमाकरणम् (c) यथार्थानुभवः (d) ज्ञातविषयम्

**38.** "त्रिगुणादि–विपर्ययादधिष्ठानात्"

इत्यत्र कस्योल्लेखः क्रियते ?

(a) पुरुषस्य (b) प्रकृतेः (c) अविद्यायाः (d) इन्द्रियाणाम्

**39.** जीवनयुक्तः करोति साक्षात्कारम् –

(a) सुखस्य (b) दुःखस्य (c) ब्रह्मणः (d) अन्यस्य

**40.** 'यथागौस्तथा गवय' इति वाक्य विवेचयति –

(a) प्रत्यक्ष प्रमाणम् (b) अनुमान प्रमाणम् (c) शब्द प्रमाणम् (d) उपमान प्रमाणम्

**41.** प्रमाणादि षोऽश पदार्थानां तत्त्वज्ञानाद् भवति –

(a) ज्ञान प्राप्तिः (b) मोक्ष प्राप्तिः (c) स्वर्ग प्राप्तिः (d) धनप्राप्तिः

42. भारतीय दर्शनशास्त्रस्य प्रवेश द्वारमस्ति –

(a) न्यायशास्त्रम् (b) मीमांसा शास्त्रम् (c) व्याकरण शास्त्रम् (d) योग सूत्रम्

43. केवल विकृत रूपात्मकानि तत्त्वानिकति –

(a) पञ्च (b) नव (c) षोडश (d) पञ्चविंशतिः

44. सांख्यमतानुसारेण अध्यवसायो कस्य धर्मः ?

(a) प्रकृतेः (b) बुद्धेः (c) पुरुषस्य (d) अन्तःकरणस्य

45. 'गगनारविन्दं सुरभिः' अत्र कः हेत्वाभासः ?

(a) आश्रयासिद्ध (b) स्वरूपासिद्ध (c) विरुद्ध (d) व्याप्यत्वासिद्ध

46. अध्यारोपलक्षणमस्ति –

(a) जीवे ब्रह्मण आरोपः (b) अवस्तुनि अवस्त्वारोपः

(c) वस्तुन्यवस्त्वारोपः (d) न किमपि

47. स्याद्वाद-प्रवर्तक-दर्शनमस्ति –

(a) बौद्ध दर्शनम् (b) जैन दर्शनम् (c) सांख्य दर्शनम् (d) मीमांसा दर्शनम्

48. बौद्धमतानुसारेण कति प्रमाणानि सन्ति ?

(a) द्वे (b) त्रीणि (c) चत्वारि (d) पञ्च

49. 'क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः' सूक्तिरियम् सम्बद्धाऽस्ति –

(a) स्वप्नवासदत्तेन (b) मेघदूतेन (c) बुद्धचरितेन (d) शिशुपालवधेन

50. अयुतसिद्धौ कौ भवतः ?

(a) प्रमाणरहितं ज्ञानमयुतसिद्धम् ।

(b) संयोग समवाय सम्बन्ध युतावयुतसिद्धौ ।

(c) ययोर्मध्ये एकमविनश्यदपराश्रितमेवावतिष्ठतेतावयुतसिद्धौ ।

(d) प्रत्यक्षप्रमाणपदौ भवतोऽयुतसिद्धौ ।

51. 'अरण्ये मया रुदितमासीत्' – कस्य कथनमिदम् अभिज्ञानशाकुन्तले

(a) विदूषकस्य (b) राज्ञः दुष्यन्तस्य (c) सेनापतिना (d) दौवारिकेन

52. वेदान्तसारे समुल्लिखितं – "सदसद्भ्यामनिर्वचनीयं त्रिगुणात्मकं ज्ञान विरोधि ....' त्ववमस्ति –

(a) विवेकः (b) अज्ञानम् (c) जीवात्मा (d) प्रकृति

53. सदानन्दस्य मतेन सूक्ष्म शरीराणि कति अवयव युक्तानि भवन्ति ?

(a) पञ्चदश (b) षोडश (c) सप्तदश (d) अष्टादश

54. अज्ञानस्य भवति शक्तिः –

(a) द्वयम् (b) त्रयम् (c) चतुष्टयम् (d) पञ्च

55. सपक्षस्योहाहरणं विद्यते –

(a) महाह्रदः (b) पर्वतः (c) महानसः (d) आकाशः

56. अपोहवादस्य सिद्धान्त उपकल्पितः –

(a) न्यायदर्शने (b) बौद्धदर्शने

(c) सांख्यदर्शने (d) उपर्युक्तेषु न कस्मिंश्चित् ।

57. पञ्चीकरण प्रक्रिया निरूपिता वर्त्तते –

(a) न्यायदर्शने (b) सांख्यदर्शने (c) तर्कभाषायाम् (d) वेदान्त सारे

58. पटस्य वेमादिकं भवति –

(a) समवायि कारणम् (b) असमवायिकारणम्

(c) निमित्तकारणम् (d) उपादान कारणम्

59. के विषयाः वेदान्ते वर्णिताः ?

(a) ते सर्वे उपनिषद् आधृत्य प्रतिपादिताः सन्ति ।

(b) ते सर्वे ब्राह्मणग्रन्थम् आधृत्य प्रतिपादिताः सन्ति ।

(c) ये सर्वे आरण्यक ग्रन्थमाधृत्य प्रतिपादिताः सन्ति ।

(d) ये सर्वे पुराणमाधृत्य प्रतिपादिताः सन्ति ।

60. सांख्यमतानुसारेण प्रमेयसिद्धिः कथं भवति ?

(a) तर्केण (b) प्रमाणाद्धि (c) श्रमेण (d) ज्ञानेन

61. निश्चितसाध्यधर्मा धर्मी कथ्यते –

(a) पक्षः (b) सपक्षः (c) विपक्षः (d) अतिदेशः

**62.** वैभाषिक सम्प्रदायस्य सम्बन्धोऽस्ति –

(a) वेदान्त दर्शनेन (b) जैन दर्शनेन (c) बौद्ध दर्शनेन (d) चार्वाक दर्शनेन

**63.** सांख्यदर्शने 'मोक्ष' इति पुरुषार्थस्य कृते कः शब्दः प्रयुक्तः भवति ?

(a) कैवल्यम् (b) अपवर्गः (c) निर्वाणम् (d) निःश्रेयस्

**64.** 'न प्रकृतिः न विकृतिः' इति कारिकांशं' कस्मै प्रयुक्तमस्ति ?

(a) महते (b) पुरुषाय (c) प्रकृत्यै (d) अहंकाराय

**65.** अनुबन्ध चतुष्टये नास्ति –

(a) अधिकारी (b) विषयी (c) सम्बन्धः (d) प्रयोजनम्

**66.** वेदान्तसारानुसारम् अज्ञानस्य शक्तिरस्ति –

(a) अध्यारोपः (b) अपवादः (c) पर्यावरणम् (d) आवरणम्

**67.** लिङ्गपरामर्शः भवति –

(a) प्रथमं ज्ञानम् (b) द्वितीयं ज्ञानम् (c) तृतीयं ज्ञानम् (d) चतुर्थं ज्ञानम्

**68.** न्यायदर्शने प्रमाणानि भवन्ति –

(a) त्रीणि (b) चत्वारि (c) पञ्च (d) षट्

**69.** सांख्यकारिकायां प्रकृतिः अस्ति –

(a) प्रकृति विकृतिः (b) विकृतिः (c) प्रकृतिरविकृतिः (d) न प्रकृतिर्नविकृतिः

**70.** उद्देशो लक्षणं परीक्षा चेति कस्य शास्त्रस्य प्रवृत्तिः ?

(a) न्यायशास्त्ररस्य (b) योगशास्त्रस्य (c) नाट्यशास्त्रस्य (d) काव्यशास्त्रस्य

**71.** सांख्यकारिका मते एकादशेन्द्रियाणि कस्माद् समुद्भूतानि ?

(a) आकाशात् (b) अहंकारात् (c) पञ्चमहाभूतेभ्यः (d) पुरुषात्

**72.** यमाद्यष्टाङ्गानि विद्यन्ते –

(a) सविकल्पक समाधेः (b) जीवस्य

(c) निर्विकल्पक समाधेः (d) शरीरस्य

CONFIDENTIAL CONFIDENTIAL CONFIDENTIAL CONFIDENTIAL

**73.** नाममात्रेण वस्तुसङ्कीर्तनमुच्यते –

(a) परीक्षा (b) उद्देशः (c) लक्षणम् (d) हेतुः

**74.** यस्यकार्यात्पूर्वभावो नियतोऽनन्यथा – सिद्धश्च .... तदुच्यते –

(a) उद्देश्यम् (b) कारकम (c) प्रत्ययः (d) कारणम्

**75.** साक्षात्कारिण्याः प्रमायाः करणं नास्ति –

(a) ज्ञानम् (b) जगत् (c) इन्द्रियार्थ सन्निकर्षः (d) इन्द्रियम्

**76.** पञ्च ज्ञानेन्द्रियेषु नास्ति –

(a) त्वगिन्द्रियम् (b) रसनेन्द्रियम् (c) उपस्येन्द्रियम् (d) घ्राणेन्द्रियम्

**77.** सत्वगुणं भवति –

(a) वरणकम् (b) चञ्चलम् (c) अवरोधकम् (d) प्रकाशकम्

**78.** 'उपशरदम्' इत्यस्मिन् पदे समासोऽस्ति –

(a) अव्ययीभावः (b) द्विगुः (c) तत्पुरुषः (d) बहुव्रीहिः

**79.** राजवार्तिककृतेः प्रणेता वर्त्तते –

(a) सिद्धसेन दिवाकरः (b) भट्ट अकलङ्कः

(c) समन्त भद्रः (d) कुन्दकुन्दाचार्यः

**80.** सर्वनामस्थान संज्ञा विधापकं सूत्रमस्ति –

(a) स्वादिष्वसर्वनामस्थाने (b) सर्वनाम्नः स्मै

(c) सह सुपा (d) सुऽनपुंसकस्य

**81.** निम्नलिखितेषु प्रगृह्य संज्ञकं सूत्रं नास्ति –

(a) ईदूदेद्द्विवचनं प्रगृह्यम् (b) ओत्

(c) अनचि च (d) अदसो मात्

**82.** 'तपरस्तत्कालस्य' कीदृशं सूत्रमस्ति ?

(a) परिभाषस् सूत्रम् (b) संज्ञा सूत्रम् (c) विधि सूत्रम् (d) अतिदेश सूत्रम्

**83.** 'हलोऽनन्तराः ..... ।' कथ्यते –

(a) संयोगः (b) सन्निकर्षः (c) गुणः (d) उदात्तः

**84.** 'अक्षशौण्डः' इत्यत्र समास नामास्ति –

(a) अव्ययीभावः (b) तत्पुरुषः (c) बहुव्रीहि (d) द्विगुः

**85.** भूधातोर्लिट् लकारे प्रथमपुरुष बहुवचने रूपमस्ति –

(a) भवितारः (b) अभूवन् (c) बभूवुः (d) अभवन्

**86.** 'उदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते' सूक्तिरियम् अभिज्ञानशाकुन्तले उक्ता –

(a) शार्ङ्गरवेन (b) काश्पेन (c) अनुसूयया (d) शकुन्तलयः

**87.** 'प्रेजते' इत्यत्र सन्धि विधायक-सूत्रमस्ति –

(a) प्रादयः (b) ऋत्यकः (c) अन्तादिवच्च (d) एङि पररूपम्

**88.** 'जटाभिस्तापसः' इत्यत्र तृतीया विधायक – सूत्रमस्ति

(a) इत्थंभूतलक्षणे (b) अपवर्गे तृतीया (c) सहयुक्तेऽप्रधाने (d) चतुर्थ्यये तृतीया

**89.** 'गङ्गौघः' इति शब्दे केन सूत्रेण सन्धि जाता ?

(a) आद्गुणः (b) अदेङ्गुणः (c) वृद्धिरेचि (d) लोपः शाकल्यस्य

**90.** 'स्मृतः' इति पदे कः प्रत्ययः ?

(a) क्तवतु (b) तुमुन् (c) णिच् (d) क्त

**91.** 'उत्थापयति' शब्दस्य सन्धिः केन सूत्रेण सञ्जाता ?

(a) मोऽनुस्वारः (b) खरि च

(c) अनुस्वारस्य यपि परसवर्णः (d) वा पदान्तस्य

**92.** 'ध्रुवमपायेऽपादानम्' सूत्रे अपाय शब्दस्य कोऽर्थः ?

(a) वेशः (b) क्लेशः (c) संश्लेषः (d) विश्लेषः

93. "डुदाञ्-दाने" इति धातोः लट् लकारस्य प्रथम पुरुषस्य बहुवचने रूपमस्ति –

(a) ददाति (b) ददन्ति (c) ददति (d) दधाति

94. 'शिष्यः' अत्र कः प्रत्ययः ?

(a) ल्युट् (b) क्यप् (c) तुमुन् (d) ण्वुल्

95. 'गवेन्द्रः' अस्य पदस्य सन्धि विच्छेदोऽस्ति –

(a) गव + इन्द्रः (b) गौ + इन्द्रः (c) गो + ईन्द्रः (d) गो + इन्द्रः

96. 'ण्वुल्' प्रत्ययस्योदाहरणमस्ति –

(a) कारणम् (b) कारकः (c) कार्यम् (d) कृत्यम्

97. 'हिमवतः प्रभवति गङ्गा' इत्यत्र पञ्चमी विधायक – सूत्रमस्ति –

(a) वारणार्थानामीप्सितः (b) आख्यातोपयोगे

(c) जनिकर्तुः प्रकृतिः (d) भुवः प्रभवः

98. आद्योच्चारणं भवति –

(a) सन्देशः (b) निर्देशः (c) उपदेशः (d) अन्यत् कश्चित्

99. 'कृति' शब्दे कः प्रत्ययः ?

(a) क्तिन् (b) क्विप् (c) टाप् (d) अन्यत् कश्चित्

100. पति शब्दस्य षष्ठी एकवचने रूपं भविष्यति –

(a) पतेः (b) पत्यै (c) पत्युः (d) पतिना

101. 'टि' संज्ञाविधायक सूत्रम् –

(a) टित आत्मनेपदानां टेरे (b) अचोऽन्त्यादि टि

(c) टेः (d) अव्यय सर्वनाम्नामकच् प्राक् टेः

102. 'उपकृष्णम्' इत्यस्य पदस्य विग्रहः वर्तते –

(a) कृष्णस्य सादृश्यम् (b) कृष्णस्य पश्चात्

(c) कृष्णं प्रति (d) कृष्णस्य समीपम्

**103.** गुण संज्ञा विधायक सूत्रमस्ति –

(a) आद्गुणः (b) अदेङ् गुणः (c) भिदेर्गुणः (d) गुणो यङ्लुकोः

**104.** सुबन्त तिङन्त शब्दाः व्याकरणे प्रोच्यन्ते –

(a) धि शब्देन (b) टि शब्देन (c) पद शब्देन (d) सवर्ण शब्देन

**105.** 'दिव्' धातोर्लोट लकारस्योत्तमपुरुषद्विवचनान्तं रूपं भवति –

(a) दीव्यावः (b) दीव्याव (c) दीव्यताम् (d) अदीव्यम्

**106.** 'शिवच्छाया' इत्यत्र विग्रहः स्यात् –

(a) शिव + छाया (b) शिवस् + छाया (c) शिवच् + छाया (d) शिवत् + छाया

**107.** 'कटे आस्ते' इति वाक्ये 'कट' पदे सप्तमी विधायक सूत्रमस्ति –

(a) आधारोऽधिकरणम् (b) साधकतमं करणम्

(c) अकथितं च (d) सप्तम्यधिकरणे च

**108.** शालातुरीयः कस्यापरं नाम ?

(a) पतञ्जलेः (b) कात्यायनस्य (c) पाणिनेः (d) शाकरायनस्य

**109.** कर्मणा यं अभिप्रैति सः ..... भवति –

(a) अपादानम् (b) सम्प्रदानम् (c) अधिकरणम् (d) कारकः

**110.** 'जनिकर्तुः प्रकृतिः' इति सूत्रेण निर्दिष्टं कारकमस्ति –

(a) अपादनाम् (b) करणकारकम् (c) सम्प्रदानम् (d) अधिकरणम्

**111.** 'स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु सूक्तिरियं कस्मात् ग्रन्थातात् उद्धृता –

(a) मृच्छकटिकात् (b) मेघदूतात् (c) उत्तररामचरितात् (d) रत्नावल्याः

**112.** संस्कृत व्याकरणशास्त्रे कारकाणि सन्ति

(a) त्रीणि (b) चत्वारि (c) षट् (d) सप्त

113. वेदपुरुषस्य मुखस्थानीयमस्ति –

(a) काव्यशास्त्रम् (b) व्याकरणशास्त्रम् (c) नाट्यशास्त्रम् (d) दर्शनशास्त्रम्

114. व्याकरणशास्त्रस्य प्रथमः प्रवक्ता अस्ति –

(a) ब्रह्मा (b) नारदः (c) पाणिनिः (d) वरदराजः

115. 'ववृते' इति क्रियापदे कः लकारः प्रयुक्तः ?

(a) लोट् लकारः (b) लिट् लकारः (c) लृट् लकारः (d) लङ् लकारः

116. धातोः भेदाः भवन्ति –

(a) पञ्च (b) चतस्रः (c) तिस्रः (d) द्वि

117. 'रुध्' धातोः आत्मनेपद लोट् लकारस्य प्रथम पुरुषैकवचने रूपं भवति –

(a) रुन्धे (b) रुन्धताम् (c) रुन्धतु (d) रुन्धम्

118. '<u>दानीयो</u> विप्रः' इत्यत्र रेखाङ्कित स्थले प्रत्ययो कस्मिन्नर्थे वर्त्तते ?

(a) कर्त्तरि (b) कर्मणि (c) सम्प्रदाने (d) भावे

119. परवल्लिङ्गं भवति

(a) द्वन्द्व तत्पुरुषयोः (b) बहुव्रीहि द्वन्द्वयोः (c) तत्पुरुषाव्ययी भावयोः (d) न कोऽपि

120. 'इ इन्द्रः' इत्यत्र 'इ' पदं वर्त्तते –

(a) नामवाचकः (b) भाववाचकः (c) उपसर्गः (d) निपातः

121. 'सौ च' इति सूत्रेण भवति –

(a) उपधा दीर्घः (b) अन्त्ये दीर्घः (c) उपधा वृद्धि (d) गुणादेशः

122. 'रो रि' इति सूत्रस्योदाहरणं वर्त्तते –

(a) शिवो वन्द्यः (b) भो देवाः (c) हरी रम्यः (d) एष विष्णुः

123. वरदराजाचार्य प्रणीत लघुसिद्धान्त – कौमुद्यानुसारेण प्रमुख समास भेदाः सन्ति –

(a) चत्वारः (b) पञ्च (c) षट् (d) अष्ट

**124.** 'ससजुषो रुः' इति सूत्रं कस्मिन् सन्ध्यन्तर्गते भवति –

(a) विसर्ग सन्ध्यन्तर्गते (b) हल्सन्ध्यन्तर्गते
(c) अच् सन्ध्यन्तर्गते (d) न कस्यात्यन्तर्गते

**125.** 'आशिष्' शब्दस्य तृतीया एकवचनस्य रूपं भवति –

(a) आशिषे (b) आशिसा (c) आशिषेण (d) आशिषा

**126.** 'खन्' धातोः आत्मनेपद लिट् लकारस्य प्रथम पुरुष बहुवचने रूपं भवति –

(a) चख्निध्वे (b) चख्ने (c) चख्निनरे (d) चख्निषे

**127.** 'अनभिहिते कर्त्तरि' विभक्तिः भवति –

(a) द्वितीया (b) तृतीया (c) पंचमी (d) षष्ठी

**128.** 'यदि + अपि' इत्यंशे सन्धिर्भवति –

(a) गुण सन्धिः (b) दीर्घ सन्धिः (c) वृद्धि सन्धिः (d) यण् सन्धिः

**129.** 'आत्मा' इति कस्य शब्दरूपम् ?

(a) अजन्त पुलिङ्गशब्दस्य (b) हलन्त पुलिङ्गशब्दस्य
(c) सर्वनाम शब्दस्य (d) संख्यावाचकशब्दस्य

**130.** 'अर्धपिप्पली' इत्यस्मिन् पदे समासोऽस्ति –

(a) द्विगुः (b) अव्ययीभावः (c) तत्पुरुषः (d) द्वन्द्वः

**131.** 'विश्वासोपगमादभिन्न गतयः शब्दं सहन्ते मृगाः' अभिज्ञानशाकुन्ते कस्य कथनमिदम् ?

(a) सूतस्य (b) राज्ञः दुष्यन्तस्य (c) शकुन्तलायाः (d) वैखानसस्य

**132.** लौकिक संस्कृत साहित्यस्य आदिकविः प्रोच्यते –

(a) भासः (b) कालिदासः (c) वाल्मीकिः (d) वेदव्यासः

**133.** संस्कृत वाङ्मये उपलब्धा प्राचीनतमा आख्यायिका वर्त्तते –

(a) हर्षचरितम् (b) कादम्बरी (c) दशकुमार चरितम् (d) भीष्म चरितम्

**134.** रत्नावल्यां विदूषकरूपे कः प्रतिष्ठितः ?

(a) माधव्यः (b) मैत्रेयः (c) भट्टकः (d) वसन्तकः

**135.** मुद्राराक्षसे वर्णितं पात्रं विद्यते –

(a) शंकारः (b) माढव्यः (c) शकरदासः (d) शाङ्र्गरवः

**136.** माघे सन्ति त्रयोगुणाः –

(a) उपमार्थगौरवपदलालित्यम् (b) माधुर्यौजप्रसादाः

(c) उत्प्रेक्षाकान्ति समाधयः (d) रीतिरसालङ्कारा:

**137.** 'जि' धातो लिट्लकारे प्रथम पुरुष वचने एवं रूपं भवति –

(a) जिगाय (b) जिग्युः (c) जिग्मु (d) जिग्मुः

**138.** "अश्वः श्वेतो धावति" अत्र का लक्षणाऽस्ति ?

(a) प्रयोजनवती सारोपा–लक्षणलक्षणा (b) रूढि–सारोपा–लक्षणलक्षणा

(c) प्रयोजनवती–सारोपा–उपादानलक्षणा (d) रूढि–सारोपा–उपादानलक्षणा

**139.** अष्टादश–पुराणेषु न गण्यते –

(a) इन्द्रपुराणम् (b) ब्रह्मपुराणम् (c) पद्मपुराणम् (d) शिवपुराणम्

**140.** श्रीमद्भागवत् महापुराणे स्कन्धानां संख्याऽस्ति –

(a) सप्त (b) एकादश (c) द्वादश (d) चतुर्दश

**141.** निम्नलिखितेषु नायकेषु को धीरोदात्तः नास्ति ?

(a) रामः (b) उदयनः (c) दिलीपः (d) युधिष्ठिरः

**142.** मृच्छकटिके चारुदत्तस्य पुत्रस्य नामास्ति –

(a) रदनकः (b) शर्विल्लकः (c) रोहितसेनः (d) वसन्तसेनः

**143.** "किमप्यहिंस्यस्तव चेन्मतोऽहं यशः शरीरे भव मे दयालुः ।"

इत्ययं श्लोकः कस्मिन् ग्रन्थे ?

(a) रघुवंशे (b) बुद्धचरिते (c) किरातार्जुनीये (d) नैषधीयचरिते

**144.** "एतद्देश–प्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः ।।"
इत्ययं श्लोकान्वित–ग्रन्थोऽस्ति –

(a) हर्षचरितम् (b) भीष्मचरितम् (c) याज्ञवल्क्य स्मृतिः (d) मनुस्मृतिः

**145.** कौटिल्यमतानुसारेण "कृषिपाशुपाल्येवाणिज्याः च" कस्याः विद्यायाः विषयाः ?

(a) आन्वीक्षिकी (b) त्रयी (c) वार्त्ता (d) दण्डनीति

**146.** "न परिचयं रक्षति नाभिजनमीक्षते ।
न रूपमालोकयते ...... ।"
इत्यादि लक्षणयुक्ता कादम्बर्यां काऽस्ति ?

(a) वृद्धमतिः (b) राजलक्ष्मी (c) मद्यप्रवृत्ति (d) मत्तदृष्टिः

**147.** "भीष्मचरितम्" इति महाकाव्यस्य रचनाकारः कः ?

(a) प्रो. रेवाप्रसाद द्विवेदी (b) प्रो. भट्ट मथुरानाथशास्त्री
(c) अप्पाशास्त्री (d) प्रो. हरिनारायण दीक्षितः

**148.** "....... भवभूतिरेव तनुते"
रिक्तस्थाने समुचितं पदं वर्त्तते –

(a) हास्यम् (b) वैषम्यम् (c) कारुण्यम् (d) सौन्दर्यम्

**149.** 'पम्पासरोवर वर्णनम्' अस्मिन्नुपलश्यते

(a) कादम्बर्याम् (b) हर्षचरिते (c) बुद्धचरिते (d) दशकुमारचरिते

**150.** 'तपोवन संवर्धितोऽनभिज्ञोऽयंजनः कैतवस्य'
उक्तिरियम् अभिज्ञानेशाकुन्तले उक्ता –

(a) मरीचेन (b) शारद्वतेन (c) शार्ङ्गखेन (d) गौतम्यया

**151.** "नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेव' उक्तिरियं कस्मात् ग्रन्थात् उद्धृता ?

(a) मृच्छकटिकात् (b) मेघदूतात् (c) स्वप्नवासदत्तात् (d) मुद्राराक्षसात्

**152.** ‘चित्रगुः’ इत्यस्मिन् पदे समासोऽस्ति –

(a) द्वन्द्वः (b) अव्ययीभावः (c) कर्मधारयः (d) बहुव्रीहिः

**153.** किरातार्जुनीयमहाकाव्यस्य प्रतिनायकः कोऽस्ति ?

(a) किरातः (b) अर्जुनः (c) युधिष्ठिरः (d) दुर्योधनः

**154.** मृच्छकटिकम् अस्ति एकम् –

(a) नाटकम् (b) प्रकरणम् (c) डिमः (d) वीथी

**155.** ‘मेघदूतम्’ खण्डकाव्यस्य अंगीरसः –

(a) करुणः (b) करुणविप्रलम्भः (c) सम्भोग शृंगारः (d) विप्रलम्भ शृंगारः

**156.** ‘अर्थो हि कन्या परकीय एव’ इदं वाक्यं सम्बद्धमस्ति –

(a) स्वप्नवासवदत्तेन (b) मेघदूतेन

(c) अभिज्ञान शाकुन्तलेन (d) उत्तररामचरितेन

**157.** ‘उद्गलितदर्भकवला मृग्यः परित्यक्तनर्तना मयूराः’ उक्तिरियम् अभिज्ञानशाकुन्तलेन उक्ता –

(a) प्रियम्बदया (b) अनुसूयया (c) गौतम्यया (d) काश्यपेन

**158.** नाटकस्य नायको भवति –

(a) धीरललितः (b) धीरोदात्तः (c) धीरप्रशान्तः (d) धीरोद्धतः

**159.** “वरं विरोधोऽपि समं महात्मभिः” इत्युक्तिः कस्मिन् ग्रन्थे प्राप्यते ?

(a) मेघदूते (b) कुमार सम्भवे (c) किरातार्जुनीये (d) रघुवंशे

**160.** ‘हरि’ शब्दस्य द्वितीया बहुवचने एवं रूपं भवति –

(a) हरयः (b) हर्योः (c) हरी (d) हरीन्

**161.** मुख्यार्थबाधे सति का शक्तिः प्रवर्त्तते ?

(a) अभिधा (b) लक्षणा (c) व्यञ्जना (d) तात्पर्या

**162.** 'शिशुपालवधम्' महाकाव्यस्य अंगीरसः अस्ति –

(a) शृंगारः (b) करुणः (c) वीरः (d) हास्यः

**163.** 'प्रयुक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव' – कथनमिदं कस्मात् ग्रन्थात् उद्धृताऽस्ति ?

(a) मृच्छकटिकात् (b) उत्तररामचरितात् (c) रत्नावल्याः (d) मेघदूतात्

**164.** 'मनोरथा नाम तटप्रपाताः' सूक्तिरियं कस्मात् ग्रन्थात् उद्धृताऽस्ति ?

(a) अभिज्ञानशाकुन्तलात् (b) मृच्छकटिकात्

(c) उत्तररामचरितात् (d) रत्नावल्याः

**165.** 'पूर्वाभाष्यं सुलभविपदां प्राणिनामेतदेव' उक्तिरियम् उद्धृताऽस्ति

(a) मुद्राराक्षसात् (b) शिशुपालवधात् (c) मेघदूतात् (d) रत्नावल्याः

**166.** कौटिलीय अर्थशास्त्रे राज्ञः सेना विषये उल्लेखः कस्मिन् अधिकरणे निर्दिश्यते ?

(a) प्रथमाधिकरणे (b) द्वितीयाधिकरणे (c) तृतीयाधिकरणे (d) चतुर्थाधिकरणे

**167.** "उदिते ……. काव्ये क्व माघः क्व च भारविः" इत्यत्र रिक्तस्थानं पूरयत –

(a) नैषधे (b) रघुवंशे (c) शिशुपालवधे (d) किरातार्जुनीये

**168.** सुखात् चतुर्वर्गफलप्राप्तिर्भवति –

(a) नाटकादेव (b) गद्यादेव (c) कथाया एव (d) काव्यादेव

**169.** वेद्यान्तरस्पर्शशून्यो भवति –

(a) रसः (b) गुणः (c) रीतिः (d) वृत्तिः

**170.** विदूषकशून्यं नाटकमस्ति –

(a) वेणीसंहारम् (b) मुद्राराक्षसम् (c) उत्तररामचरितम् (d) महावीरचरितम्

**171.** "रसतामेति इत्यादिः स्थायीभावः सचेतसाम्" इत्येदं वाक्यं कस्य ग्रन्थस्य अस्ति ?

(a) काव्यप्रकाशस्य (b) ध्वन्यालोकस्य (c) व्यक्तिविवेकस्य (d) साहित्यदर्पणस्य

**172.** 'बोधिचर्यावतार' ग्रन्थस्य रचनाकारः अस्ति –

(a) श्रीकृष्ण जोशी
(b) पण्डित लक्ष्मीपति पाण्डेयः
(c) शान्तिदेवः
(d) त्रिलोचन पाण्डेयः

**173.** 'नरनारायणीय' काव्यस्य रचनाकारः अस्ति –

(a) उर्वीदत्त डंगवालः
(b) सदानन्द डबरालः
(c) बालकृष्ण भट्ट :
(d) कुमुदानन्द बहुगुणाः

**174.** महाभारतस्य माहात्म्यं कस्मिन् पर्वणि विद्यते ?

(a) आश्वमेधिक पर्वणि
(b) स्वर्गारोहण पर्वणि
(c) महाप्रास्थानिक पर्वणि
(d) शान्तिपर्वणि

**175.** धार्मिकोत्सवानां पर्वणां च वर्णनं कस्मिन् पुराणे कृतम् ?

(a) नारदीय पुराणे
(b) विष्णु पुराणे
(c) भागवत्पुराणे
(d) अग्नि पुराणे

**176.** 'गौर्वाहीकः उदाहरणेऽस्मिन् का लक्षणा ?

(a) रूढौ लक्षणलक्षणा – सारोपा – गौणी
(b) प्रयोजने – उपादान लक्षणा – साहयवसाना गौणी
(c) रूढावुपादानलक्षणा – साहयवसाना गौणी
(d) प्रयोजने लक्षणलक्षणा – सारोपा – गौणी

**177.** वाच्योऽर्थः कया बोध्यः ?

(a) अभिधया
(b) लक्षणया
(c) व्यञ्जनया
(d) तात्पर्यया

**178.** अष्टमूर्तिशिवः कस्य नाटकस्य नान्द्यामुपलभ्यते ?

(a) स्वप्नवासवदत्तस्य
(b) उत्तररामचरितस्य
(c) अभिज्ञानशाकुन्तलस्य
(d) मुद्राराक्षसस्य

**179.** "यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् – क्वचिद्" उक्तिरियं कस्मै प्रोक्तम् ?

(a) मनुस्मृत्यै
(b) रामायणाय
(c) न्यायदर्शनाय
(d) महाभारताय

**180.** ऋग्वेदीय पुरुष सूक्तस्य ऋषिरस्ति ।

(a) वामदेवः (b) नारायणः (c) मधुच्छन्दा (d) विश्वकर्मा

**181.** शतपथब्राह्मणस्य रचयिता कः ?

(a) मधुच्छन्दा (b) मनुः (c) याज्ञवल्क्यः (d) गौतमः

**182.** याज्ञवल्क्य मैत्रेयी संवादः कस्मिन्नुपलभ्यते –

(a) ऐतरेयोपनिषदि (b) बृहदारण्यकोपनिषदि

(c) छान्दोग्योपनिषदि (d) प्रश्नोपनिषदि

**183.** "असूर्या नाम ते लोकाः" मन्त्रोऽयं कुत्र उपलभ्यते ?

(a) ईशोपनिषदि (b) कठोपनिषदि (c) प्रश्नोपनिषदि (d) केनोपनिषदि

**184.** ऋग्वेदीय प्रथम् सूक्तस्य देवताऽस्ति –

(a) सवितृ (b) इन्द्रः (c) रूद्रः (d) अग्निः

**185.** 'किमिव हि मधुराणा मण्डनं नाकृतिनाम्' सूक्तिरियम् अभिज्ञानशाकुन्तले कस्मिन् अङ्के उक्ता ?

(a) तृतीयोऽङ्के (b) चतुर्थोऽङ्के (c) प्रथमोऽङ्के (d) पञ्चमोऽङ्के

**186.** वेदाङ्गानां मध्ये गणना न भवति –

(a) व्याकरणस्य (b) शिक्षायाः (c) कल्पस्य (d) आरण्यकस्य

**187.** हिरण्यगर्भः समवर्त्तताग्रे

भूतस्य जातः पतिरेक आसीत् .... ।

इत्यस्मिन् मन्त्रे छन्दः वर्त्तते –

(a) त्रिष्टुप (b) जगती (c) अनुष्टुप् (d) बृहती

**188.** "यज्जाग्रतो दूरमुदैति दैवम्" ...... ।

इति मन्त्र कस्मिन् सूक्ते अस्ति ?

(a) अग्नि सूक्ते (b) शिवसंकल्प सूक्ते (c) इन्द्र सूक्ते (d) अक्ष सूक्ते

**189.** "आत्मानं रथिंन विद्धि शरीरं ...... ।"

इत्येन पूर्यताम् –

(a) गृहमेव तु (b) क्रतुमेव तु (c) धुरमेव तु (d) रथमेव तु

**190.** षोडशं संस्कारेषु जातकार्मं संस्कारः भवति –

(a) प्रथमः (b) तृतीयः (c) चतुर्थः (d) पंचमः

**191.** ऋृक् संहितायाः उत्पत्तिः सञ्जाता –

(a) सूर्यतः (b) अग्नितः (c) वायुतः (d) अङ्गिरातः

**192.** बालगङ्गाधर तिलक महोदयस्य मतानुसारं वेदानां रचनाकालोऽस्ति –

(a) 600 ई. पूर्व (b) 6000 ई. पूर्व (c) 600 ईस्वी (d) अन्यद किमपि

**193.** मन्त्रेषु 'स्वरित' स्वराङ्कनं क्रियते –

(a) अधः (b) मध्ये (c) उपरिष्टात् (d) वामतः

**194.** त्रिविक्रम इति विशेषणम् –

(a) अग्नेः (b) वरुणस्य (c) विष्णोः (d) अश्विनोः

**195.** माध्यन्दिनशाखा कस्य वेदस्य वर्त्तते ?

(a) यजुर्वेदस्य (b) ऋग्वेदस्य (c) सामवेदस्य (d) कस्यापि न

**196.** यज्ञे यजुर्वेदसम्बद्धोऽस्ति –

(a) होता (b) अध्वर्युः (c) ब्रह्मा (d) उद्गाता

**197.** 'शतर्चिन्' कस्य संज्ञा वर्त्तते ?

(a) मधुच्छन्दसः (b) भरद्वाजस्य (c) वशिष्ठस्य (d) विश्वामित्रस्य

**198.** निरुक्ते षड्भावविकाराः केनोक्ताः

(a) गालवेन (b) शाकटायनेन (c) गार्ग्यायणेन (d) वार्ष्यायणेन

**199.** निरुक्तानुसारमाख्याते भवितुमर्हति –

(a) भावप्रधानत्वम् (b) सत्वप्रधानत्वम् (c) कर्मप्रवचनीयत्वम् (d) नामप्रधानत्वम्

**200.** उच्चावचेष्वर्थेषु निपतन्ति –

(a) संज्ञाः (b) निपाताः (c) शाखाः (d) वेदाः

---